Print Date, Cover &c.

No. 110

अष्टादशज्ञातयः॥ ब्रह्मक्षत्रियवैश्यशूद्रविपणीगोपालतैलक्रियाः पांचालापटकृत्विचित्रपटकृत्वरूछिद्रीनापितः॥ वरूत्रशालकचर्मलुब्धकनटाश्वांडालमातंगिनोरतेष्टादशज्ञातयोमुनिकृताः संगीकृतेसंकराः॥१॥

॥अथबृहज्जातिविवेकप्रारंभः॥

श्रीगणेशायनमः॥ अथजातिविवेकोलिख्यते॥ सद्योजातवपुःपुराणपुरुषोरुद्रोपिशांतात्मवानी
शानोपिचपश्चिमागमपरःशुभ्रोपिछछातितः॥ वामेदक्षिणतांगतोमिखतिर्दक्षाध्वरध्वंसक तृ
ज्ञात्वासच्चरितंतमेवमखिलंयस्तंनमामीश्वरं॥१॥ योविनासच्चिदानंदःसर्वज्ञोनसईश्वरः॥ दृ
ष्टज्ञानक्रियारूपोनंबंदेछक्तिमंबिकां॥२॥ ब्रह्मणोयन्मुखंनेशुतिराजप्रपंचतः॥ भजेत्तमाद्यं
पुरुषंवर्णादिकारणं॥३॥ नारायणस्ततोभानुरीश्वरःसामसंज्ञिकः॥ भद्राभिधानंचायुस्तेप्र
त्यंडपुरवासिनः॥४॥ चत्वारस्तनयास्तस्यासन्सामराजस्यविश्रुताः॥ विश्वनाथोमहादेवोभानु
र्लक्ष्मधरस्तथा॥५॥ संख्यावनय्यसंबुद्धिश्चनाथोगुणव्रजैः॥ निवासःश्रीसरस्वत्योर्यौदा
र्यकलयाश्रयः॥६॥ वसिष्ठान्वयसंभवःसचपुनःश्रीविश्वनाथःकलोव्यासत्वंस्वयमन्वगा

छ्रुतिपरःकिंतत्रचित्रंमहत्॥ तस्माच्छाङ्धरःकलासुकुशलःप्रादुर्भवस्तद्भवोगोपीनाथकविःक
रोतिसकलंजातेर्विवेकंस्फुटं॥७॥ मन्वादिश्रुतिशास्त्रवाक्यनिचयात्संगृह्यविस्तारितोयंग्रंथोजाति
विवेकएषविदुषांगोपीश्वरेणक्षितौ॥ सुरयःस्वीकुरुतेरसंक्षितितलाहृर्षासुवर्षंसलं लोकानां
हितकाम्ययेवसततंमान्यःसधन्योयथा॥८॥ आचारव्यवहारेचप्रायश्चित्तेविशेषतः॥ ज्ञात्वा
ज्ञातिविवेकंचद्विजःपूज्यत्वमर्हति॥९॥ ब्रह्मक्षत्रियविट्शूद्रावर्णाःप्रोक्तास्वयंभुवा॥ तेषांध
र्माःपृथक्ख्यातास्त्रयःपूर्वेद्विजालयः॥१०॥ वर्णेभ्योयेसमुत्पन्नाःप्रतिलोमानुलोमतः॥ ता
न्प्रवक्ष्यामिनामकर्मविभेदतः॥११॥ वर्णानांत्रिषुयेजातास्त्रयोराजाःप्रथमेमताः॥ परस्प
रंविवोढव्यास्तेषुजातास्तथापरे॥१२॥ मौंजीबंधादिलोपेनतेत्रिधासंप्रकीर्तिताः॥ आनुलोम्येनव

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

र्णानांषड्वंतिमेरितः क्रमात्॥१३॥प्रतिलोम्येनषड्तेस्युरितिद्वादशभेदतः॥एतेद्वादशमिश्रासुचतु
र्वर्णैर्विमिश्रिताः॥१४॥तेस्युरष्टादशभेदाषष्ठीद्वादशसंयुताः॥हतास्तेषष्ठितंतंरंध्रषट्त्रिंश
छतसंख्यया॥भेदाःसंकरजातीनांबहवस्युस्तथापरे॥तेषांभेदानुभेदेनप्रभवंतिकलौयुगे॥१६॥
असंख्यातास्तुजायंतेतान्वक्तुंकःप्रगल्भते॥वर्णोत्तःकथिताःकैश्चित्पूर्वसंकरजातयः॥१७॥तासांना
मानिकर्माणिधर्माधर्मान्ब्रुवेधुना॥यास्तवल्क्यः॥तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमं॥ब्रह्म
क्षत्रविशांभार्यास्योदेकाशूद्रजन्मनः॥१८॥मूर्द्धावसिक्तोंबष्ठश्चनिषादोब्रह्मतःक्रमात्॥माहि
ष्योग्रोक्षत्रियतोनुलोमाःकरणोविशः॥१९॥इत्यनुलोमषट्कं॥अयोगवश्चक्षत्ताचचांडालःशूद्र
संभवः॥विशोमागधवैदेहौनृपात्सूतोविलोमजाः॥२०॥इतिप्रतिलोमषट्कं॥तथाचमनुः॥विप्रो

मूर्धावसिक्तस्तुक्षत्रियायांविशःस्त्रियां॥जातोंबष्ठस्तुशूद्रायांनिषादःपारसवोपिवा॥२३॥माहि
ष्योग्रोप्रयैजातेबष्ठस्तुविट्शूद्रयोर्नृपात्॥शूद्रायांकरणोवैश्याद्विनास्वेवंविधिस्मृतः॥२४॥
आसनण्यांक्षत्रियात्सूतोवैश्योद्वैदेहिकस्मृतः॥शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृतः॥२५॥
क्षत्रियोमागधंवैश्याच्छूद्रातक्षत्तारमेवच॥शूद्रायेणवंवैश्याज्जनयामासवैसुतं॥२६॥माहिषे
णकरेण्यांतुरथकारःप्रजायते॥अस्मिंतंतस्तुविज्ञेयाप्रतिलोमानुलोमजाः॥२७॥आत्रेयोदेवस्त्थै
वार्षःप्राजापत्यस्तथासुरः॥गांधर्वोराक्षसश्चेतिपैशाचोष्टोकरग्रहाः॥२८॥यास्तवल्क्यः॥चत्वा
रोआसनाप्यास्याद्याःशस्तागांधर्वराक्षसौ॥राक्षस्तथासुरोवैश्येशूद्रेचास्यंतगर्हितः॥२९॥औरसः
क्षेत्रजश्चैवदत्तकःकृत्रिमस्तथा॥गूढोपन्नोपविद्धश्चकानीनश्चसहोढजः॥३०॥क्रीतःपुन

र्भवश्चैवदशापुत्रीःप्रकीर्तिताः॥२९॥इतिदशापुत्राः॥इत्याषोडशसंस्काराःकायस्थाजननासुराः॥
द्विजशूद्रास्यजानांचमयाप्रोक्ताःपृथक्पृथक्॥३०॥अथजातिविवेचनं॥स्त्रीपुंयशेखरानाम
ब्राह्मणेनसुसंगता॥सासूतेतनयंसोपिभोजकोमागधाभिधः॥३१॥सूर्यपूजावृतस्यास्यवृत्ति
रेषाप्रकल्पिता॥नतेनपितृवत्कार्याक्रियाःसर्वाविशेषतः॥३२॥भोजकोमागधः॥तस्यमागध
जातिस्तुकन्यकाविप्रसंगता॥तत्युत्रःशाश्वतीकश्चित्कथितोदेवकाभिधः॥३३॥प्रतिमांपूजये
द्विष्णोरसौशंकरचिन्हतः॥सपर्याजनितंतासाद्विप्रांतस्यजीवनं॥३४॥अपांक्तेयोप्यभोज्यानो
वर्णत्रयबहिष्कृतः॥तथाचमनुः॥देवार्चनपरोविप्रोक्षितोपित्सरत्रयं॥३५॥असौदेवलकोना
मसर्वकर्मसुगर्हितः॥स्पृष्ट्वादेवलकंचैव सवासाजलमाविशेत्॥३६॥बडवा॥क्षत्रियाविप्रसं ३

योगाज्जातोमूर्धावसिक्तकः॥राजन्यःक्षत्रधर्मेभ्योभ्यधिकःसंप्रकीर्तितः॥३७॥मूर्धावसिक्तोराज
न्यः॥ब्रह्मण्याएतेद्वादशभेदतः॥एतेद्वादशभेदास्तुचतुर्वर्णैर्विमिश्रिताः॥येस्युरष्टाभ्योभे
दाषष्टिद्वादशसंयुताः॥येषष्टिसंमिताभेदास्तेप्रजासंज्ञकाःस्मृताः॥षष्टिहस्तास्तेतत्संख्यैःष
ट्त्रिंशत्शतसंख्यया॥भेदाःसंकरजातीनांबहवस्युस्तथापरे॥तेषांभेदानुभेदैश्चप्रभवंति
कलौयुगे॥असंख्याताःस्मृजायंतेतान्वक्तुंकःप्रगल्भते॥वर्णतःकथिताःकाश्चित्पूर्व्यैपाद्दतथै
कायथाक्रमं॥ब्राह्मणक्षत्रियविशांभार्याश्चशूद्रजन्मनः॥मूर्धावसिक्तांबष्ठ्यनिषादाब्र
ह्मतःक्रमात्॥माहिष्योग्रोक्षत्रियतोअनुलोमाःकरणोविशः॥इत्यनुलोम्यषट्कं॥अथोगव
सुक्षत्रंचचांडालःशूद्रसंभवः॥विशोमागधवैदेहोन्नपात्स्तोनुलोमजः॥तथाचमनुः॥विप्रा

न्मूर्धावसिक्तस्तुक्षत्रियायांविशःस्त्रियां॥जातोंबष्ठस्तुशूद्रायांअनुलोमांजातःपार्थवः॥नि षा
दःपार्थवोपिवा॥माहिष्योग्रप्रजायेतेविट्शूद्रांगनयोर्नृपात्॥शूद्रायांकरणोवैश्यात्विन्ना
स्त्वेषविधिस्मृतः॥ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्मृतः॥शूद्रजातस्तुचांडालःसर्वध
र्मबहिष्कृतः॥क्षत्रियामागधंवैश्यात्शूद्रात्क्षत्तारमेवच॥शूद्रायांयोगंबवैश्याजनया
मासवैसुतं॥प्रतिलोम्यषट्कंनतुमूर्धावसिक्तादीनिनजात्यंतराणि॥अनुलोमजानांमातृ
समानजातीयत्वात्॥तदाहविष्णुः॥समानवर्णासुपुत्राःसमावर्णाभवंति॥इत्यनुलोमासु
मातृषुसमानवर्णाःप्रतिलोमाः॥स्वार्थविगर्हितानाइति॥रौरवेपि॥क्षत्रियांब्राह्मणेनो
त्पन्नःक्षत्रियएवभवति॥क्षत्रियात्वैश्यायांवैश्यएवभवति॥वैश्येनशूद्रायांशूद्रएव ४

भवति॥नेषदोषः॥अनयोर्वचनयोर्मातृजास्वुचितधर्मप्राप्त्यर्थत्वात्॥अन्यथाबीजो
त्कर्षवैय्यर्थ्यापत्तेः॥तथाक्षेत्रापकर्षउत्कृष्टजातिनिवारकः॥एवंबीजोत्कर्षोनिकृष्टजा
तिंकुतोननिवारयेत्॥तस्माज्जात्यंतराएवमूर्धावसिक्तादीनि॥एवंउत्तरत्रसाजात्यवच
नानितत्तधर्मपराणि॥यतोजातयस्तुवर्णांतरालएव॥अथमूर्धावसिक्तादीनांक्रमात्उत्त
योलिख्यते॥क्षत्रियाविप्रसंयोगाज्जातोमूर्धावसिक्तकः॥राजन्यःक्षत्रधर्मेभ्योभ्यधिकः
संप्रकीर्तितः॥अस्यवृत्तिर्बृहदुशनसाउक्ता॥हस्त्यश्वरथशिक्षाअस्त्रधारणंचवृत्तिर्मू
र्धावसिक्तानां॥लघुउशनसाअस्येवउत्पत्तिर्वृत्तिश्चोक्ता॥यथा॥विधिनाब्राह्मणःप्रा
प्यनृपायांतुसमंत्रकं॥जातःसवर्णइत्युक्तोसानुलोमाद्विजःस्मृतः॥अथवर्णक्रियांकुर्व

नित्यनैमित्तिकंक्रियां॥अश्वंरथंहस्तिनंवावाहयेद्वेत्रपाणयया॥सेनापत्यंभयेजंचकुर्या
ज्जीवनवृत्तिषु॥वैश्यस्त्रीद्विजसंभूतोबष्ठःस्यादनुलोमजः॥अन्येभ्योवैश्यजातिभ्योषट्क
र्मस्वधिकःस्मृतः॥नरवाजिगजादीनांचिकित्सातस्यजीवनं॥वैश्यायांविधिनाजातोयंबष्ठ
इतिकथ्यते॥कृष्याजीवोभवेत्तस्यतथैवाग्न्यनर्तकः॥ध्वजनिश्रावकावापिअंबष्ठाःशस्त्र
जीवनाः॥लघुउशनसाचअस्योत्पत्तिःवृत्तिश्चअन्यथादर्शिता॥नृपायांविप्रतश्चौर्यात्सं
जातोयोभिषक्स्मृतः॥अभिषिक्तनृपस्याज्ञांप्रतिपाल्यतुबंधकः॥अथर्ववेदमष्टांगंतत्रो
क्तंधर्ममाचरेत्॥ज्योतिषंगणकंवापिकार्यंकंवृत्तिमाचरेत्॥इत्युपरांबष्ठः॥लघुउशनसा॥ ५
शूद्रायांविधिनाविप्राज्जातःपारशवउच्यते॥भद्रकालीसमाश्रित्यपूजातज्जीवनंस्मृतं॥शौवाद्या

गमविद्याद्येस्तथामद्यलवृत्तिकः॥पार्श्वः॥बृहदुशनसावर्णांतरंदर्शितं॥द्विजातिशुश्रूषाधान्याध्य
क्षताचपार्श्वस्य॥तस्यैवैचोरसंगस्यानिषादोजातउच्यते॥वनेदुष्टमृगान्हत्वाजीवनंमांसविक्रयः॥
पार्श्वनिषादःस्वर्णकारः॥अस्यैववर्णांतरंगोपीनाथेनदर्शितं॥अस्यचसंज्ञाद्वयंपार्श्वइत्युक्तेब्राह्म
णेढाशूद्राजातपार्श्वभ्रमोमाभूदितिसंज्ञांतरंनिषादइत्युक्तेप्रतिलोमजनिषादभ्रमोमाभूदितिपा
र्श्वइतिसंज्ञाकरणं॥वैश्याक्षत्रियेयोजीतोमाहिष्यस्त्वनुलोमजः॥अष्टाधिकारनिरतःश्चतुषस्यंग
कोविदः॥व्रतबंधादिकास्तस्यक्रियास्यसकलाविदुः॥ज्योतिषंशाकुंशास्त्रंस्वस्त्रशस्त्रंचजीविका॥
अष्टाधिकारः॥मध्यस्पष्टग्रहछायोदयास्तापुष्यवत्ग्रहो॥यातश्रृंगोन्नतिश्चाष्टावधिकाराग्रमे
स्थयः॥बृहदुशनसाअस्येववर्णांतराण्याह॥माहिष्याणांगीतनृत्यक्षत्रजीवनंरक्षाचवृत्तिः॥

ज्योतिषी॥शूद्राक्षत्रियतोरुग्रःक्रूरकर्मेतिगीतये॥सशस्त्राभ्यासकुशलःसंग्रामकुशलोभवेत्॥
तयावृत्तिंसजीवन्सन्शूद्रधर्मोश्वपालयेत्॥लघुउशनसावृत्यंतरं॥यथा॥शूद्रायांक्षत्रसंयो
गाज्जातउग्रइतिस्मृतः॥नृपस्यदंडधारस्यदंड्यादंड्येषुसंचरेत्॥बृहदुशनसाअस्यैववृत्यंतरा
णिराजसेवा॥उग्रायामुत॥वैश्यवीर्येणशूद्रायांयोजातोवैतालिकाभिधः॥चारणोसावीयभवे
त्न्यूनोवृषलधर्मतः॥रातांचब्राह्मणानांचगुणवर्णनतत्परः॥संगीतंकामशास्त्रंचस्वरज्ञा
नंचजीविका॥करणः॥चारणःमनुनाअपरः॥करणोदर्शितः॥सल्लोमकुश्वराजन्याद्यास्त्रि
छविरेवच॥नटश्चकरणश्चैवखेरवाद्रविडेवच॥ब्राह्मात्क्षत्रियासवर्णायांसप्तदयःजाय
ते॥एकस्यैवदेशभेदप्रसिध्येतानिनामानिवृत्तिश्चास्यलघूशनसादर्शिता॥चारवृत्तित्वात्॥

नटकरणनामुदकाहरणंप्रपावेश्मदानंच॥इत्यपरःकरणः॥अथप्रतिलोमजानाह॥वैश्य
स्त्रीशूद्रसंयोगात्जातायोगवसंज्ञकःसशूद्रधीयतेधर्मपाषाणेष्टकर्मकृत्॥सकुर्याकु
ट्टिमांभूमिंचूर्णनास्यैवजीवनं॥लघुउशनसाअस्यैववृत्यंतराणि॥अयोगवस्यतक्षणं॥
आयोगवःपायरटः॥चुनाडा॥क्षत्रिणीशूद्रसंयोगात्क्षत्तारंजनयेत्सुतं॥निषादवृत्तिवि
ख्यातःसर्वधर्मबहिष्कृतः॥शूद्राचारविहीनश्चपापबुद्धिरतःसदा॥वागुरापाशपालिस्तु
मृगबंधनकोविदः॥आरण्यपशुजातीनामंतकोसौवनेचरः॥क्रोधान्वितोमांसवृत्यात
याजीवित्स्यैवहि॥घंटापाषधिकावृत्यादात्रोविरमयका॥द्विधापायर्धिरस्योक्ताव्यालभू
चारिणामिह॥विक्रयंमधुनःकृत्वाधनमिच्छत्स्ववृत्तये॥लघुउशनसाअस्यैववृत्यंतराण्यो

हाक्षत्तादीनांस्वावित्रोधादिबंधनंवृत्तिः॥क्षतापारधी॥ब्राह्मण्यांशूद्रवीर्यणजातश्चांडा
लउच्यते॥सीसमाभरणंतेषांकार्ष्णायसमथापिवा॥वध्याकंठेसमाबध्यशल्करीकक्षतोपि
वा॥मलापकर्षणंग्रामेपूर्वान्हेपरिऋद्धिक॥नापरोक्षप्रविष्टेपिबहिर्ग्रामाच्चनेक्षते॥पिंडी
भूताभवंत्यत्रनोचेद्ध्याविशेषतः॥चांडालः॥तथाचमनुः॥चांडालश्वपचानांचनिर्ग
स्यात्प्रतिश्रयः॥अयःयाश्चकर्तव्योधनमेषांचगर्दभाः॥वासांसिमृतचेलानिभिन्नभांडे
षुभोजनं॥कार्ष्णायसमलंकारःपरिव्रज्याचनित्यशः॥नेतैःसमयमन्विछेत्पुरुषोधर्ममा
चरत्॥व्यवहारोमिथस्तेषांविवाहसदृशैःसह॥अन्नमेषांपराधीनंदेयंस्याद्भिन्नभाजने॥
रात्रौनविचरेयुस्तेग्रामेषुनगरेषुवा॥दिवाचरेयुःकार्यार्थंचिह्नितोराजशासनैः॥अबां

धवंशावंचैवनिर्हरेयुरितिस्थितिः॥चांडालः॥क्षत्रियीमागधंवैश्याजनयामासवैसुतं॥
सबंदीजनइत्युक्तोव्रतबंधादिवर्जितः॥न्यूनताशूद्रधर्मेभ्यःतस्यजीवनमुच्यते॥कथालं
करणाद्यादिषद्भाषासुकलाक्रमः॥गद्यपद्यादिचित्राणिबिरुदानिमहीभृतां॥मनुनायुयं
तराण्याह॥मागधानांस्थलपथचारियथावाणिज्य॥लघुशस्त्रास्त्रसाअस्यैवक्षत्रियंतराण्याह॥
वंदित्वंब्राह्मणानांचक्षत्रियाणांविशेषतः॥प्रशंसावृत्तिकाजीवेद्देवयप्रेयस्करस्तथा॥मा
गधः॥ब्राह्मण्यांजायतेवैश्याद्योसौवैदेहिकाभिधः॥शुश्रूषांतरक्षणंराज्ञांकुर्याद्वनुयमंस्मिः॥
सामान्यवनितावैश्यातासांभाटीचजीविका॥तस्योक्तासर्वधर्माणांनाधिकारोस्तिकस्यचित्॥
पण्यांगनानांराज्ञांचकुर्यात्संगतदिछया॥रूपजीवासुतास्त्वेवंनिश्चियःसंगतोविदः॥सर

वतासांप्राणेशोनान्यःकांतोपितस्यति॥ चतुषष्टिकलाकामशास्त्रंतदनुजीवनं॥भरतात्॥
वेदांगागमशास्त्रशिल्पकविताचक्रूचतोयंत्रिकंधूतास्त्राद्भुतवादसूपरचनाचित्रंपणेवे
द्यकं॥नानारत्नपुराणलेखपुरुषस्त्रीधातुभाषालिपिप्रश्नोनाटककेलिदंतितुरगप्रेक्षा
चसासुद्रिकं॥शय्याभोजनयुद्धमर्दनविभूषावंधरेवेनगातज्ञारज्जुतरिसभारतकृतिः
सोरव्येष्टभोगेषुधीः॥त्रापंचाग्निविषाग्निवोरिषुरथारेटांगशीर्षेषुयदुर्गारामकृतिःपशु
द्विपचमत्कारःशिवार्चोदयः॥२॥सुगंधवनितावस्त्रंगीततांबूलभोजनं॥शय्याचशूषणंचै
वभोगाष्टकमुदाहृतं॥१॥अस्येवद्वयंतराणिलघुउशनसादर्शितं॥वेदेहिकानामंतःपुरर
क्षाचचरंतिः॥वैदेहिकः॥सावासि॥पण्यांगना॥ब्राह्मण्यांक्षत्रियात्सूतोप्रतिलोम्येनजायते॥

गजबंधनमश्वानांवाहनंकर्मसारथेः॥वैश्यधर्मेषुतस्येहनाधिकारःकचिद्भवेत्॥उचुउशनसाअ
स्यैवद्वयंतराण्याह॥सूतानां॥अश्वदमनयोगनादिकंचर्यंतिः॥प्रतिलोम्यषट्कं॥वैश्यायामेववि
न्नायांविकर्मीस्थाच्चवैश्यतः॥लाटदेशेसमुत्पन्नोलाटइत्यभिधीयते॥सवैश्यइवविज्ञेयश्चामरा
णांचविक्रयी॥ब्राह्मवैश्यसमुत्पन्नोवैश्याभ्यांव्यभिचारतः॥विभूतिंधारयेद्भाले कंठेलिंगंप्रपूजयेत्॥
मरीचहिंगुसामुद्रजीर्णोर्णापटविक्रयः॥जीविकाचास्यकथिताशूद्रधर्माधिकोपिसः॥लिंगोपवि
ता॥वैश्यास्तुजायतेब्रह्मात्स्वयन्वाचार्यएवच॥भारूपश्चविजन्माचमैत्रःसाचतएवच॥ब्राह्मोद्वै
श्यात्सवर्णायांसुधन्वाद्योजायंते॥एकस्यै---------श्चपूजाविधानं॥अयशिष्टानांवृत्त
यः॥उशनसादर्शिताः॥ब्रह्मक्षत्रियोरन्येःपरराष्ट्रानांकोशमंत्रवृत्तज्ञानांमित्रामित्रशाचरेयेति॥वि

प्रः संस्कारहीनश्चेद्ब्रात्यइत्यभिधीयते॥ ब्राह्मण्यांतस्ययःपुत्रोभ्रज्जकंठःसहिस्मृतः॥भ्रजकंठः॥
ब्राह्मण्याभ्रजकंठात्तुसुतस्त्वावर्त्तकोभवेत्॥आवर्त्तकः॥ब्राह्मण्यावर्त्तकाभ्यांचपुत्रःसकटधा
नकः॥कटधानः॥ब्राह्मण्याकटधानेनसूतोसौपुष्पशेखरः॥वैश्यवोलोकभाषाया॥भ्रजकं
ठादयःप्रोक्ताश्चत्वारःपूर्वतःक्रमात्॥तिषांकर्माणिवक्ष्येहंजीवनायविशेषतः॥वर्ण्याहरिहसे
तेश्चगीतगाथाप्रबंधकैः॥चरितैर्दैशभाषाभिर्गेयंतज्जीविकास्मृताः॥लोकाचारास्मृतास्तेषां
शूद्रधर्मावहिष्कृचित्॥इतिभ्रजकंठः॥अथविवाहः॥मनुस्मृतौ॥ब्रह्मोदैवस्तथैवार्षःप्रजा
पत्यस्तथासुरः॥गांधर्वोराजसश्चैवपिशाचश्चाष्टमोकरग्रहः॥याज्ञवल्क्यः॥चत्वारोब्राह्मणस्या
द्याःशस्तागांधर्वराक्षसौ॥राज्ञस्तथासुरोवैश्येशूद्रेचांत्यस्तुगर्हितः॥इत्यष्टोविवाहः॥तत्र ९

क्षणं॥ब्राह्मोविवाहआहूयदीयतेशक्त्यलंकृता॥तज्जस्तुनाकभयतःपुरुषानेकविंशतिः॥१॥यज्ञ
स्थऋत्विजेचैवदीयतेकन्यकायदा॥सदैवइतिविख्यातोविवाहःपूर्वसूरिभिः॥२॥गोद्वंद्वमादाद
यसोप्राजापत्योनिगद्यते॥धर्मेचार्थेचकामेचनातिक्रामोहिसंस्मृतः॥३॥आकुराद्रविणादा
नात्गांधर्वःसमयान्मिथः॥राक्षसोयुधहरणात्पैशाचःकन्यकाछलात्॥इत्यष्टोविवाहाः॥
अथसंकरजातिविवेचनमारभ्यते॥तर्हिसंकरजातिर्बीजक्षेत्रमंतरेणनसंजाघटितीति॥अ
त्रतयोरंतरेप्राधान्यःकस्येतिग्रंथकर्तुराशंकासुरीकृयतन्निराकरणार्थंमनुवाक्यंसचनि
र्णयंकरोति॥अनार्यमार्यकर्मणमपिचानार्यकर्मिणं॥संप्रधार्याब्रवीद्वाचानसमौनसमा
विति॥अनार्यायांसमुत्पन्नोब्राह्मणात्तुयदृछया॥ब्राह्मण्यमपिनार्याञ्चश्रेयस्त्वंकेनविद्भवेत्॥

ता भावप्यसंस्कार्यावितिधर्मोव्यवस्थितः॥वैगुण्याज्जन्मनःपूर्वमुत्तरःप्रतिलोमजः॥बीजमेके
प्रशंसंतिक्षेत्रमेकेमनीषिणः॥बीजक्षेत्रेतथैवान्येतत्रेयंतुव्यवस्थितिः॥अक्षेत्रेबीजमुद्दिष्टं अं
तरैवविनश्यति॥अबीजकमपिक्षेत्रंकेवलंस्थंडिलंभवेत्॥तस्माद्बीजप्ररोहेणतिर्यंजापुरुषो
भवत॥पूजिताश्चप्रशस्ताश्चतस्माद्बीजंप्रशस्यते॥अथसंस्कारनिरूपणंकथ्यते॥द्विजानांषो
डशोवस्युःशूद्राणांद्वादशोवहि॥पंचैवमिश्रजातीनांसंस्काराःकुलधर्मतः॥तेचसंस्काराः॥यथा॥
गर्भाधानंपुंसवनंसीमंतंजातकर्मच॥नामकार्यनिष्क्रमणंअन्नप्राशनचौलके॥मौंजिवेदम
हानाम्निमहाव्रतमतःपरं॥उपनिषद्व्रतंगोदानसमावर्तनकंमिथः॥विवाहःपुत्रकामायसंस्का
राःषोडशस्मृताः॥वेदव्रतोपनयनमहानाम्निमहाव्रतं॥विनाद्वादशशूद्राणांसंस्कारानाममंत्र

तः॥अष्टमांगत्यमादास्यात्सनामकरणंपरं॥अन्नप्राशनचौलंचविवाहःपंचमःस्मृतः॥चातु
र्वर्ण्यस्यसेवाहिलिपिलेखनसाधनं॥व्यवसायःशिल्पकर्मतज्जीवनमुदाहृतं॥शिखायज्ञोपवीतं
चधोत्रमारक्तमंभसा॥स्पर्शनंदेवतानांचकायखाद्योविवर्जयेत्॥अत्रैवमनुनाविशेषउक्तः॥
स्वजातिजानंतरजाषट्सुताद्विजधर्मिणः॥शूद्राणांतुसधर्माणःसर्वेपध्वंसजाःस्मृताः॥द्विजा
तीनांसमानजातीयासुभार्यासुजातास्त्रयः॥ब्राह्मेणात्क्षत्रियोवैश्ययोर्जातौद्वौ॥क्षत्रियोद्विज्ञा
यांजातःएकःइत्येतेषट्सुताद्विजधर्मिणः॥उपनेतव्याः॥येपुनःअन्येसंकरजाःसुतादयःतेस
र्वेतुल्यरूपाःतेषांद्विजात्वस्यनानामपिउपनयनंनास्ति॥ततोबीजप्रभावेणतेगछंतियुगेयुगे॥
उत्कर्षेचापकर्षेचमनुष्येष्विवजन्मतः॥तेस्वजातिजानंतरजास्तत्प्रभवेनहेतुनाउत्कर्षक्रियालो

पादिहेतुना चापंक्तेर्यजातितोगच्छंति॥तथाचाह॥शनकैस्तुक्रियालोपादिमाःक्षत्रियजातयः॥ वृषलत्वंगतालोकेब्राह्मणातिक्रमेणच॥इमाःवक्ष्यमाणाःक्षत्रियजातयःसत्क्रियनयनक्रियालोपेनब्राह्मणानांचयजनाध्यापनंप्रायश्चित्ताद्यर्थदर्शनाभावेनशनैर्लोकेऽदर्शनंप्राप्ताः॥पौंड्रकाश्चौड्रविडाकांबोजायवनाःशकाःपारदाःपह्लवाश्चीनाकिरातादिअनेकधा॥पौंड्रकादयःक्षत्रियाःसंतःक्रियालोपादिनाशूद्रत्वमापन्नाः॥मुखबाहूरुपजानांयालोकेजातयोबहिः॥म्लेंछवाचोपवाचोवासर्वतेदस्यवःस्मृताः॥ब्राह्मणाक्षत्रियवैश्यशूद्राणांयाबाह्यक्रियालोपादिनाजातयोम्लेंछभाषायेताआर्यभाषायुक्तावावर्वरचुकाराधास्तेसर्वेदस्युशब्दवाच्याःस्मृताः॥येद्विजानामपसदायेचापध्वंसजाःस्मृताः॥तेनिंदितैर्वर्तयेयुर्द्विजानामेवकर्मभिः॥येद्वि ११

जानांप्रतिलोम्येनोत्पन्नायेचद्विजातेरपिशूद्रायामानुलोम्येनजातास्तेद्विजातयुपकारकेरेवानिंदितैःकर्मभिर्जीवयेयुः॥अधुनासंप्रवक्ष्यामिसमूहान्लोकविश्रुतान्नृ॥प्रतिलोम्यानुलोम्याभ्यांयेमिश्राद्वादशाःस्मृताः॥एतएकैकवर्णासंमिश्राषष्टिस्तेस्युःप्रजाभिधाः॥षष्टिप्रजाः॥मणिकांस्यघटस्वर्णलोहस्यंदनकारकाः॥सिंदोलःसोषिरोनीलिकर्त्तीकिंशुकशौक्किकौ॥पांशुकःकर्मचांडालोरेभिकोबंधुलस्तथा॥कुक्कुटश्चाथठठारश्चर्मचोष्टादशकास्मृताः॥१६॥सप्तसमूहाः॥मालाकारःशांबरश्चशाल्मलीभोक्कलस्तथा॥कारावारःपुल्कसश्चश्वपाकःसप्तताःप्रजाः॥सप्तसमूहः॥आचारसारे॥रजकश्चर्मकारश्चनटोबुरुडएवच॥कैवर्तश्चैवविज्ञेयोमेदभिल्लौतथैवच॥अनंतरंरकादशसमूहाः॥तेखलुरक्त्यादिहिंसकायश्चहिंसकाः॥सासेहिकामाहडाश्चमातंगाउंबगोपकाः॥एताःप्रकृतयःप्रोक्ता

एकादशमनीषिणः॥ वर्णानामाश्रमाणांचसर्वदातुबहिस्थिः॥ अंत्येयावंत्यजोचतयोस्नानंविशुध्
ये॥ आद्येयेअंत्यजाःपंचतेषामाचमनंस्मृतं॥ चांडालःपुल्कसोम्लेछश्वपाकःपतितस्तथा॥ एते
पंचसमाख्यातापंचपातकिनोसमाः॥ मत्तोन्तरं॥ आरामिकोमणीकारःतंतुवायश्चलोमकः॥ नापि
तोदासकश्चैवप्रेष्यःस्यामध्यमाश्चषट्॥ मनुः॥ ब्रह्महाममद्यपस्तेयीतथैवगुरुतल्पगः॥ एतेमहापात
किनोयश्चैतैःसहसंवसेत्॥ १॥ पंचमहापातकिनः॥ कायस्थजातेर्वनितांमालाकारोमिकारयेत्॥
तस्यांयस्तेनपुत्रःस्यात्सशालंकयइतिस्मृतः॥ कांताश्चेयंपुरंध्रेइंजदंतकलाविकाः॥ सहीनःशूद्रइथ
मेभ्योमणिंविरच्चयेत्सदा॥ स्फटिकान्दारवादीनिकुर्यात्तद्व्यजीविका॥ शालिकयत्मणिजेमणियार
वरत्न॥ लघुउन्नानसा॥ अपरोमणिकारोदर्शितोयथा॥ तस्यांतस्यैवचौर्येणमणिकारःप्राजाय

ते॥ मणिकानांराजतानांमुक्तानांवेधनक्रिया॥ प्रबलोनांचसूत्रेवंशंखानां वलयक्रिया॥ तस्यां
वैश्यायामेवक्षत्रियात्चौर्येणजातोमणिकारःसउच्यते॥ इत्यपरोमणिकारः॥ १॥ पद्मपुराणेका
लिकामाहात्म्ये॥ सोमवंशेमहाराजाकार्तवीर्यार्जुनः॥ तस्यान्वयेसमुत्पन्नावीरसेनादयोन
पाः॥ २॥ तेषाप्येमन्वयेशूराः कांस्यरत्नपजीविनः॥ कांसारइतिविख्याताःकालिकायजनेरताः॥
अपरःकांसारः॥ गोपीनाथेनदर्शितः॥ सयथा॥ वैश्यस्त्रीद्विजसंभूताकन्यकांबष्टकाभिधा॥ सा
त्वंबष्टद्विजाश्लिष्टाजनयेत्तनयंहरः॥ सकांसारइतिख्यातःसततंकालिकांजयेत्॥ कांस्यपा
त्राणिचित्राणिरच्चयेज्जीवनायचे॥ सर्वत्रशूद्रधर्मेणास्थितस्यविधीयते॥ कांसारोद्विविधःप्रो
क्तोराजजन्मातथेतरः॥ तत्राद्यराजसंस्काराअंतेपंचप्रकीर्तिताः॥ कांसारः॥ शूद्राक्षत्रियायो

जीतःपाशीवेतीतिजायते॥सास्तेक्षत्रियात्पुत्रंविधातंताम्रकुट्टनं॥ससर्वाःसहकांसारीकुर्यात्सतु
विशेषतः॥घट्टनंताम्रपात्राणांतत्स्यीवर्तजीविना॥शस्त्रक्रियाटङ्ककोलोकेतावटसंज्ञकः॥ता
म्रघटकर्ता॥शूद्राक्षत्रियायोजीतावनितोम्राभिधानका॥ब्राह्मणाजनयेत्पुत्रमाद्यंकुंभकारकं॥
सशूद्राधीयतेधर्मंघटयेन्मृन्मयान्घटान्॥आद्यंःमृन्मयघटकर्ता॥शूद्रांशायनमारोप्यब्रा
ह्मणोन्यायोगतिं॥जनयेद्ग्राम्यधर्मेणयस्तस्यांपाशीवंसुतं॥सशूद्रइतिविख्यातस्तद्धर्मेणचव
र्तनं॥स्वर्णकारस्यतस्येहवस्त्रंधौतंपवित्रकं॥याज्ञवल्क्यः॥कटस्वर्णव्यवहारवर्कयासस्यविक्र
यी॥राज्ञाभिग्रहस्तुकर्तव्योदाप्यश्चोत्तमसासहं॥पार्शीवःस्वर्णकारः॥योमागधीक्षत्रिययोर्जात
उल्मुकसंज्ञकः॥सलोहकर्मणाजीवेद्वर्णतोहीनएवसः॥शस्त्रागुलंषट्समेतंतस्तद्दोषकोधि



पः॥कर्तुर्दक्षिणहस्तस्यमध्यमामध्यपर्वणः॥प्रमाणमंगुलस्योक्तंमूर्तिशास्त्रादिकर्मसु॥अस्या
र्थः॥शास्त्राचीअंगुलेअंभरतीतेयातुदृमेळविजेतियांतुनिभागसातेंदिजेजेंद्यंगुलेउरतीतोआदि
स्यादिग्रहोजाणिजे॥शास्त्राचियाशस्त्रस्वमित्रयोर्वैरंमृत्युकार्यअन्यथाशुभं॥क्षत्रिकावाविशा
खावासोमवारेणसंयुता॥तद्दिनेघटितंशास्त्रंसंग्रामेजयवर्धनं॥योगेनघटितंशास्त्रेअपामार्ग
रसेनतु॥लेपितंतद्युधिभवेद्वज्रसारंसुनिश्चितं॥उल्मुकस्तणिजेलोहार॥माहिष्येणकरिण्यांतु
रथकारःप्रजायते॥नैवोपनयनंतस्यशूद्रधर्मबहिःक्वचित्॥वर्तनंशिल्पस्यशास्त्रवित्॥स्यंदन
कारस्तणिजेरथकारः॥वंदिनीशूद्रसंयोगाज्जातःसिंदोलकाभिधः॥वर्णतोहीनएवस्यात्मंजिष्ठा
रंगकारकः॥तिनरंगेणवासांसिचित्राणिरचयेत्सदा॥हस्तलेख्यंविदित्वेदंधातुरंगसाधनं॥

सिंदोलः॥ रावणंरासूचिकाः॥ सिंपाः॥७॥ अभीरीकुकुटाभ्यांयोजातःसोखिरसंज्ञकः॥ सकुर्यात सरीणांचवासांसिचात्मकर्त्तये॥ सोखिरः॥ कुकुटीआभीरसंयोगात्निलिकर्तासकथ्यते॥ निलिकर्तीस्मणिजेकाष्ठा॥९॥ जातोनिषादवीर्येणधिग्वण्यांकिंशुकाभिधः॥ वनांतरेवसेत्वंशछेदनस्थरः॥ तैलपात्राणिकुर्वीतवंशापर्वमायान्यसो॥ वंशाधिक्रयतोलभ्यंतद्व्यंजीवनंस्मृतं॥ किंशुकः॥१०॥ मार्गानाधितयोर्जातोसाखिन्योनमसंज्ञकः॥ हीनःसगुह्यकेत्राणांकुर्याद्व्यनमंजसा॥ अलोकसुबश्रृंगाणिरक्ताक्तेमोप्रयोजयेत्॥ मनुः॥ रोमाणिचरहस्याणिसर्वाण्येवचतुर्वापयेत्॥ मंगलाचारयुक्तस्यात्प्रयतात्मजितेंद्रियः॥ मार्गामादलिकस्त्री॥ साखिन्यस्मणिजेवावर॥१३॥ निषादनारीसंयोगात्पांशुलोनामजायते॥ सेपोष्टिकसंज्ञोहिव्राणसूत्रविधायकः॥ कर्त्तीचर्मो १४

णियदानांजीविकातस्यधनं॥ पांशुलस्मणिजेपोष्टिक॥ मामाग॥१२॥ विप्रास्त्रीकृतसंन्यासआरूढपतितोभवेत्॥ ब्राह्मणीकामयेत्खंडंयोनस्याज्जनयेत्सुतं॥ सिंदोलःकर्मचांडालोतत्स्पर्शीस्यात्कंमहत्॥ महापर्वतदुर्गेषुवीथिचतुष्पथादिषु॥ हर्म्याणिपुरमार्गेचरम्यदेवालयंतथा॥ वापीकूपतडागानांप्रवाहानांचसर्वशः॥ खननंजीवनार्थायतस्येप्राक्तंमनीषिभिः॥ सिंदोलास्मणिजेकर्मचांडालघडु॥१३॥ आवर्त्तवनितासूतेसमल्लोद्रेमसंज्ञकः॥ सक्षारोदकमानीयबध्वाकेदारखंडके॥ तज्जातंलवणंतस्यलेवेणेजीवेनंविक्रयः॥ द्रामिकः॥ लोणार॥१४॥ जातोमैत्रेयशुक्रेणजाधिकायांस्वयंसुतः॥ असोबंधुलसंज्ञोवैधमःसर्वासुजातिषु॥ सुवर्णकारविपणेधूत्यांहेमसपश्यति॥ मैत्रेयः॥ प्रातःमंगलगीतगायकः॥ बंधुलकः॥ झार॥१५॥ निषादकन्यकारुद्रसंयोगाज्जनयेत्सुतं॥ कुंघुटक्रोधिकश्चैव

प्रोक्तोवेद्वि-संज्ञकः॥ टंकशालासुसर्वत्रनाणकानांविधायकः॥जीवनायाष्टधातूनांमेल्यजेःसमतांव्रजेत्॥कुकुटस्तण्डिजेटांकसाक्षीक्रोधिक॥१६॥ मेदस्यवंशवनिताहस्तकेनयदाहरः॥पुत्रःठठारइस्कोनीचःसर्वासुजातिषु॥त्रयुलाक्षाताम्रकांस्यैःकुर्यात्तामिविभूषणं॥तद्विक्रयतोलब्धंधनंतज्जीवनंस्मृतं॥ठठारस्तण्डिजेवातारा॥सुवर्णतारताम्रंनागवंगंकांस्यतीक्ष्णकं॥मुंडोत्तमष्टकंलोहंकांस्यकुपचयमनिधिः॥१७॥मेदस्यवनितासंगाच्चांडालेजनयेत्सुतं॥सभागश्वपचोलोकेअस्पृश्यःसीसकारकः॥जीविकातस्यकथिताआविगोचर्मरज्जुभिः॥मेदजीकोलिनी॥श्वपचमांग॥१६॥अथसप्तसमुद्राःलिख्यंते॥वैश्याक्षत्रिययोर्जातोमाहिष्यइतिगीयते॥समाहिष्यांनिषादस्त्रीसंगमाज्जनयेत्सुतं॥मागलाकारमसौलोकेमालाकारःप्रकीर्तितः॥कुसुमानिस्वशरवानिवर्धयेद्धनवर्धये॥ ३५

सहीनःशूद्रधर्मेभ्यःसमूहेसप्तकेप्रभुः॥मालिः१॥संगतावेनवनितावर्तकेनयदाहरः॥तस्यांशोबरिकाभिरुग्रःपुत्रोसोलोकसंमतः॥सहीनस्तुस्वजातिभ्यःशुचिर्वासोविधायकः॥वेनवनितानरस्त्री॥आवर्ततकोगायकोब्राह्मणेवेश्यवश्चेतिलोके॥२॥साली॥क्षत्रिणीकन्यकोवैश्याजनयामासनंदिनि॥सानंदिनिद्विजात्सूतेतनयंमंगुसंज्ञकं॥समंगुःकुंभकारस्यमहित्यांयदिकामयेत्॥तस्यांचजनयेत्पुत्रंसचस्यात्कुलालाभिधः॥सहीनःशूद्रधर्मेभ्यःपर्णवल्लीविधायकः॥तांबूलवल्लिसंभूतंद्रव्यंतस्येहजीवनं॥तांबोळी॥३॥उग्रायारस्वाभ्यांयोजातोभोक्कलिकाभिधः॥वेहदसोतेलयंत्रंउत्तमश्चास्यजातितः॥जीविकास्यकथिताऋतेतेलस्यविक्रयैः॥तिलहिंसायंत्रवाकर्णनात्पापसंभवः॥अतोभोक्कलिकोनिंद्योनिर्वासेयानगराद्बहिः॥तथाचस्मृतिः॥तेत्रयंत्रेक्षुयंत्राणांयावच्छब्दःप्रवर्तते॥तावत्

र्मनकुर्वीतशूद्रांयपतितस्यच॥अतोमोद्कलिकोनिर्यानिर्वास्यानगराद्बहिः॥मोद्कलिकःतेली॥निषा
दधिग्वीजातःप्राणिकारावराभिधः॥सहीनस्त्वन्यजातिभ्योजीवनंतस्यचोच्यते॥आर्द्राणिगोमहिष्या
दिचर्माणितत्रशोधयेत्॥लक्षणासारसमुच्चये॥ग्रामाद्बहिःप्रकर्तव्यंवर्तुलंकुंडमेवच॥गोचर्मणा
महिष्याश्वचर्मणातस्यजीवनं॥उपानद्गात्राणिकुर्याद्श्वस्यपारवराः॥प्राणिकाराचांभारा॥
॥९॥जातोनिषादवीर्येणशूद्रांप्रत्यकसंशकः॥अंत्यजानांससहत्वाधर्मेषुविधिषुच॥आरण्यजीव
घातेनवृत्तिःस्याद्दृषोषणे॥नचयापर्थिकातस्यकथिताकाविदूषिता॥पुल्लकःकोक्की॥६॥चांडालः
पुल्कसासंगात्पश्चयाकंजनयेत्सुतं॥स्थानांतरंसनगरेवर्त्तुमर्हत्यशेषतः॥गोगर्दभपशूनांचग्रामा
न्निःसरणंबहिः॥साजीविकास्यकथितासर्वलोककविश्रुता॥महार॥७॥अथभेंत्यजसमूहोलिख्य

ते॥नेदवहा॥रजकश्चर्मकारश्चनटोबुरुडएवच॥कैवर्तश्चेवविज्ञेयोमेदभिल्लोतथैवच॥तेखल्लिरक
व्याधिहस्तकायश्चहिंसकाः॥सासेहिकाभाहडाश्चमातंगाडोंबागोपकाः॥एताःप्रकृतयःप्रोक्ताअष्टा
दशामनीषिभिः॥वर्णानामाश्रमाणांचसर्वदातुबहिस्थिताः॥आद्येचांत्यजापंचतेषामाचमनं
स्मृतं॥अंत्योयावंत्यजोचेवतयास्नानंविशुद्धये॥तेदेवाह॥ऊर्णावेदेहिकाभ्यांचजातोमंजूषसंश
कः॥शूद्रतोहीनःप्रथमश्चांत्यजेषु॥वस्त्रनिर्णेजनंकुर्यादात्मवृत्त्यर्थमेवसः॥वसानस्त्रिपणान्
राप्यानेजकस्तुपरंशुकं॥रजकःपरिट॥धिग्वाण्यायोगवाभ्यांयोजातोदुर्भरसंज्ञकः॥सकुर्या
च्छणलासम्यक्तद्वाचकरपत्रिका॥अन्यानिचर्मपात्राणिजीवनायप्ररोहकान्॥अंत्यजातिषु
मुख्योसोकीर्तितोजातिसंग्रहे॥चर्मकार॥डोहर॥२॥शिलिंध्रोक्षत्रियांगच्छेज्जनयेन्नटसंज्ञकं॥

हीनोसौशूद्रधर्मेभ्योनाटकानिसमभ्यसेत्॥कोऽहंटिकःसएवोक्तोबहुरूपीतिविश्रुतः॥अन्यःकोपिन
टोभूत्वानशूद्रैःसमतांव्रजेत्॥नटकोऽहंटी॥बहुरूपी॥३॥कुहविंदंगनासूतेधिवराकिंशुकाभिधा॥
असावंत्यजशूद्रकोवंशपात्रानुजीवनः॥कुहविंदंगनापट्टसूत्रपट्टकर्तृकास्त्री॥किंशुकस्तणिजेवं
शपात्रानुजीवीबुरुडः॥४॥अयोगवीपारसवाभ्यांयस्यांतेकेवर्तकाभिधः॥सहीनस्तंत्यजातिभ्योजा
तःस्त्रीकृतसर्वशः॥मछान्चनचरान्न्यान्घातयेदासदत्तये॥नाव्यंकर्मप्रवहणंनद्यांवर्षीसुवाहयत्॥न
दीमुत्तारयेल्लोकान्तेभ्यश्चेछन्धनंमुदा॥अयोगवीपाथरटीनपाशीवःस्वर्णकारः॥केवर्तोढीवरः॥
प्राकृतनामतादृ॥५॥कारावारीयदानारीवैदेहाज्जनयेत्सुतं॥समेदसंसरःकथितोतुत्र्योसोफलजी
विनः॥पित्तंउवेशःसवसेदरण्येवृक्षपर्वते॥कारावारोकोलिभेदः॥वैदेहःशय्यापालकःमेदःगोउः॥६॥ ३७

कारावारीयदानारीढीवराज्जनयेत्सुतं॥समिलसंसरःकथितोकंदमूलादिजीवनः॥वीभत्सवेषःसवसेद
रण्यवृक्षपर्वते॥मेदस्यवनितासंगाच्चांडालेजनयेत्सुतं॥तिरवामछसंज्ञोवैप्रोक्तःसचद्विसंज्ञकः॥दृ
मांसभक्षणंकार्यंविक्रयस्तस्यजीवनं॥जीविकासास्यकथितासवसेंनगराद्बहिः॥तिरवा॥अंधस्यवनि
तासंगाच्चांडालेजनयेत्सुतं॥स्थिरसंज्ञोसहाजीतिलोकेसर्वत्रविश्रुतः॥अश्वोष्ट्रगर्दभानांचमृता
नांकालयोगतः॥कुर्यान्निर्हरणंसोपिमांसभक्षणजीवनः॥स्थिरसंज्ञस्तणिजेहाडियामांग॥२॥
पूवस्त्रियांश्वपाकेनजातःक्व्याधिरुच्यते॥सीमायांसवसेन्नित्यंसीमारक्षणतत्परः॥क्व्याधि
ता॥३॥तेषांविक्रयोलब्धेधनंतज्जीवनंस्मृतं॥हस्तकस्त्रीश्वपाकेनकायकेजनयेत्सुतं॥हस्तकः॥
॥४॥क्व्याधिवनितासंगाच्चांडालाध्यसकोभवेत्॥मृगवग्गुलश्येनादिपक्षिपालनतत्परः॥कुर्या

द्राजावरोधस्यमालापस्थितिमन्वहं॥ यत्तिरेषास्यकथितातद्वासोनगराद्बहिः॥ कायकः॥ चांडाली क्षे
छसंयोगात्छाद्रोषजनयेत्सुतं॥ वध्यछिन्नांगमादायवणिग्विपणिषुभ्रमेत्॥ तद्व्यंजीविकातस्य
तद्वासोनगराद्बहिः॥ सद्रोषः॥७॥ पुल्कसीडोंबसंयोगाद्झाल्लोनामजायते॥ ग्रामद्वारेसरक्षे
त्तरात्रौवीथिषुसंचरन्॥ वाचमुच्चारयेद्दिष्ठं महोजाग्रत्तजाग्रता॥ भेरीडिंडिमज्ञाकोरैःपोरा
न्जागयेन्निशि॥ साजीविकास्यकथितारक्षेत्कागाःपरिपालयेत्॥ भारुडः॥ ६॥ सौनिकंकर्मचां
डालात्सूतेदासवधूसुतं॥ सकुर्यादजमेषानांहिंसातन्मांसविक्रयं॥ तद्व्यंजीविकातस्यसहीनस्त्वं
त्यजातितः॥ सौनिकस्तुणिजेहिंसकाडोंबिण्यांप्लवसंयोगात्मातंगोनामजायते॥ भूतप्रेतपिशा
चादिग्रहरक्षांसमाचरेत्॥ साजीविकास्यकथितातद्वासोनगराद्बहिः॥ मातंगः॥ ९॥ निषाद्

वनितासूतेचांडालात्डोंबसंसर्गकं॥ असावंत्यावसायीचश्मशाननिलयेवसेत्॥ तत्ररक्षांप्रकुर्वीतप्रे
तानांवस्त्रजीवनः॥ डोंबा॥१०॥ मातंगीडोंबसंयोगात्क्षपकोनामजायते॥ दाहमुक्तक्रियालुब्धंधनं
तज्जीवनंस्मृतं॥ गोपकः॥ ११॥ एकादशात्यजात्येतेसेयासर्वात्यजाधमाः॥ अथवासिद्धः॥ संक
रजातयोलिख्यंते॥ माहिष्यवनितासूतेवैदेहाद्धंप्रसूयते॥ सकायस्थइतिप्रोक्तस्यकर्मविधी
यते॥ लीपीनांदेशजातानांलेखनंसमभ्यसेत्॥ गणकत्वंविचित्रंचबीजिपाटविभेदतः॥ स्या
तयावर्तनंस्याकायस्थस्यविशेषतः॥ अथमः शूद्रजातिभ्यःपंचसंस्कारवानसौ॥ कायस्थः॥ का
यस्थोद्वाकायस्थविधवायांप्रसूयते॥ कायस्थायितरस्कस्तद्वासोनगरेबहिः॥ कायस्थयित॥
॥१२॥ उग्रामागधसंयोगाज्जातःकुंतलकाभिधः॥ सनापितइतिप्रोक्तःक्षौरकर्मविधानकृत्॥ स्म

श्मश्रुकर्तनरुचैवनखकर्तनकोविदः॥वस्त्रनयाग्रामममध्येतिष्ठन्वर्णेषुसेवकः॥नापित॥३॥शूद्र
कन्यासमुत्पन्नोब्राह्मणेननसंस्कृतः॥अपरोनापितःप्रोक्तःशूद्रधर्माधिकोपिसः॥पाठांतरं॥नरा
णांनापितोधूर्तःशूद्रेभ्योभ्यधिकःस्मृतः॥वृत्तिः॥गंगायांभास्करक्षेत्रेमातापित्रोर्मृतेदिने॥अथाने
सोमपानेचषट्सुक्षौरंविधीयते॥इत्यपरोनापितः॥४॥शूद्रादायोगवीजातावैश्यगर्भसमुद्भ
वा॥अयोगवीसासैरंध्रंकायस्थाजनयेत्सुतं॥सहीनःशूद्रधर्मेभ्यःसेवांकुर्याद्द्विजातिषु॥पा
दयोःक्षालनंतेषांधमिलानांप्रसाधनं॥अभ्यंगमर्दनंचैवचंदनस्यानुलेपनं॥मृगनाभिंदुयो
गंश्रृंगारस्यरचनाश्रयं॥जीविकातस्यसंप्रोक्तातत्स्त्रीसैरंध्रिकास्मृता॥चतुःषष्टिकलाभिज्ञारूपशी
लादिसेविनी॥प्रसाधनोपचतुरासैरंध्रिकाप्रकीर्तिताः॥५॥क्षत्रियीमद्गुसंयोगाच्छिलिंध्रइति

MEMORIAL

जायते॥हीनःसशूद्रधर्मेभ्योजीविकास्यागमर्दनं॥मर्दनि॥६॥स्त्रीपुष्पश्चेत्खरानामब्राह्मणेसहसंग
ता॥सासूतेतमयोसोपिभोजकोमागधाभिधः॥सूर्यपूजारतस्यास्यस्पष्टताभूर्जकंठतः॥७॥तस्यमाग
धजातेस्तुकन्यकाविप्रसंगता॥तस्यत्रेःशाश्वतीकश्चकथितोदेवल काभिधः॥प्रतिमांपूजयेद्विष्णो
रसोश्वारूढचिह्नितः॥सपर्यीजनितंतासांद्रविणंतस्यजीवनं॥अपांक्तेयोप्यभोज्यान्नोवर्णैस्त्रयबहिः
कृतः॥तथाचमनुः॥देवार्चनपरोविप्रोविनार्थीवत्सरत्रयं॥असौदेवलकोनामसर्वकर्मसुगर्हितः॥स्पृष्ट्वा
देवलकंचैवसवासाजलमाविशेत्॥वडवा॥पुजारा॥८॥माहिष्यस्त्रीब्राह्मणेनसंगताजनयेत्सुतं॥
अभीरमितितंविरब्रवीत्॥तेषांसंघोवसेत्घोषःबहुह्रास्यजलाश्रये॥अर्जितंगोमहिष्यादिपोषयेत्तृण
वारिणा॥दुग्धंदधिघृतंतक्रंविक्रयीतधीनायच॥शूद्रेभ्योन्यूनताधर्मेनस्यसर्वस्यविश्रुता॥गोळी॥९॥

MEMORIAL

शूद्रवाक्षत्रिणीसूतेब्राह्मक्षत्रियमेथुनात्॥पुत्रःसमुत्कटस्तत्रशूद्रधर्मविधायकः॥सकुर्याद्राजपुत्रा
श्वश्वशास्त्रनिपुणाधनं॥तेभ्योलब्धात्मवृत्त्यर्थंस्वधर्ममनुपालयेत्॥राजगुरु॥१०॥ब्राह्मण्यांवै
श्यजनितोवैदेहीतिनिगद्यते॥सासंगताब्राह्मणेनचूचूभंजनयेत्सुतं॥तस्यैवंजीविकाप्राक्तांशूद्र
धर्मसजातितः॥चूचूंभ॥छत्रधारी॥११॥द्विजशूद्रिसमायोगान्निषदाजनिताभवेत्॥निषादिद्विजतः
सूतेतनयास्थौष्टकाभिधानात्॥तेदोलावाहकारागांविद्वेषाद्वतगामिनः॥छागालावाहकास्तेस्युःकव
डीवाहकामताः॥काहाराइतिलोकेस्मिन्गर्दभैर्यजीविनः॥क्रयश्चेद्धिधनानांचतेषांधर्मानकेवप॥
दोलकारः॥भोयी॥काहारकावडीवाहकः॥छणलावाहक॥इतिपर्यायनामानि॥१२॥क्षत्रियीज
कुसंयोगाज्जातोमल्लाभिधःपरः॥लब्धायोसावनंसम्यक्बलदर्पेणगर्वितः॥राज्ञांकौतुकमुत्पाद्य २९

नियुद्धेनधनार्जनं॥कुर्यात्सानिवृत्तिनिपुणान्शूद्रधर्माणशेषतः॥मल्लः॥१३॥ब्राह्मण्यांक्षत्रि
यात्सूतं जानतीतिकीर्तितः॥ब्राह्मण्याअपिवैश्याज्जातोतिविश्रुतः॥वैदेहिसुतसंयोगात्सूतेसू
तिस्तुतंसुतः॥लेख्यादीनांचतुर्वर्णांचपाकंकुर्याद्यथारुचिः॥अन्नामतयोगेनमांसश्रावकभेदकः॥
रसैःस्वाद्म्लवणतिक्तोषणकषायकैः॥वातपित्तकफादीनांशमयेपचकःस्मृतः॥सशूद्रधर्मसद्
शःसूपशास्त्रविशारदः॥पार्वतीनलभीनामानंतेषुपरिनिष्ठितः॥गुणस्यतस्यकथिताजीविताख्ये
नकर्मणा॥रांधवण॥१४॥ब्राह्मण्यांवैश्यजनितोजातोवैदेहिकाभिधः॥तस्यशूद्रांगनासूनुर्जा
तस्त्वधासिकाभिधः॥कुर्यादन्नानिचत्वारिविक्रयार्थंससंततं॥अन्नविक्रयतोलब्धंधनंतस्यजी
वनं॥स्वंधासिक॥रांधवण॥१५॥वैश्यवर्येणशूद्रायांजातासाकारणिस्मृता॥करणीवैश्यसंयोगा

जातोवछकसंज्ञकः॥सशूद्रधर्मरहितोशाङ्गलंगाश्वपालयेत्॥यत्रयत्रभवेत्स्थंतत्रतत्रविशेषतः॥
गोवारी॥१५॥ब्राह्मणोगायकोलोकेसवेद्यभवइतीरितः॥शास्त्रेसकटधानोक्तोविप्रस्त्रीगर्भसंभवः॥क
रथानःसमंगुतांकामतोयदिगछति॥तयोर्योजायतेपुत्रःसछागलिकसंज्ञकः॥सशूद्रधर्मरहितोछा
गलंरक्षयेत्सदा॥छागलाभ्योधनंजातंतस्यजीवनमुत्तमं॥छागलिकः॥सैलिक॥१६॥मंगुसेरंध्रियो
जातःशय्यापालनसंज्ञकः॥जातस्त्वंसततंरात्रौशय्याकर्मणिकारयेत्॥मंगुतावडिकंन्यासेरंध्रि
मंदनी॥सेजवल॥१७॥कर्मचांडालवनितापुष्पश्रेखरसंगता॥जनयेद्यंसुतंसोपिख्यातोमंडलकाभि
धः॥युगुलंशनकादीनांधर्त्तुयोग्जामहीभृता॥आखेटकपणेभ्यश्चशनांजीवनमुच्यते॥कर्मचांडालव
नितागांडस्त्रीपुष्पश्रेखरः॥गायकोब्राह्मणः॥सुणधरः॥१८॥रथकारस्यवनिताजयोगवसमागता॥ज

नयेत्तनयंसोपिसूत्रधारइतीरितः॥जायाजीवध्वजश्रेलूषोनाद्यशास्त्रविशारदः॥जलमंडपिकादीनिसूत्राणि
चरयेत्सदा॥लोकविस्मयकारीणिवसेत्सनगराद्बहिः॥रंगावतारःकर्त्तव्योनाद्येनन्रपसंसदि॥चतु
र्विधेरंगहोरेःदेशभाषांगसंभवैः॥रथकारस्त्री॥पाथरट॥सूत्रधा॥३९॥कुकुटस्यैवनिताकुंभका
रेणसंगता॥तस्याःसूनुःसविख्यातःकुरुविंदइतिस्फुटं॥कोशेयानिसवस्त्राणिरचयेत्सर्वतोजये॥तुल्यो
सावंस्यजातीनांतद्धर्ममनुपालयेत्॥कुंभकार॥टंकसाळी॥२०॥औरसंछागलीसूतेभूर्जकंगल्लियंत
सः॥कुर्याद्दोर्णपटांश्चित्रानमेषानाचैवपालनं॥तस्यैवंजीविकाप्रोक्तास्वेनाविशेषतः॥छागलीशेषक
स्त्रीभूर्जकंठेगायकोब्राह्मणोवेद्यभवः॥धनगर॥आवर्त्तनवनितासूतेक्षेमकादंतपुत्रकं॥समहांगुरिति
ख्यातेउष्ट्रवाहनतादरः॥क्षेमकोद्वारपालनंस्वादधिदुग्धस्यविक्रयः॥तद्द्रव्येणास्यवृत्तिःस्याद्गो

कालकलेकरः॥क्षेमकोद्वारपालः॥कलेकर॥२३॥वेश्यस्त्रीरुद्रसंयोगाज्जातोयोगविकाभिधः॥अयो
गवीत्रास्रणाभ्यांधिग्वणस्यस्रसुद्भवः॥सचर्मणाश्वपत्याणान्यथाशोभंप्रकल्पयेत्॥तद्भक्षीविकातस्य
विहितालोकसंमता॥अश्वानांपारवराःसोपिकर्त्तुश्चित्रंशतथार्हति॥रवत्रीवमोची॥२३॥श्वेवायाःपा
शुपतश्चैवमहाव्रतपरास्तथा॥तुर्यकलामुख्याःप्रोक्तातयोर्धर्मपरायणाः॥स्वकर्मनिरतास्तेस्युःरु
द्रपूर्णयागनारतः॥तेभ्यश्चताभ्यश्चजातोभस्माकुरुतीरिः॥सजटाभस्मधारीचशिवलिंगंप्रपूजयेत्॥तो
बूलमक्षतद्रव्यंगावःक्षेत्राणिशाकिनी॥शिवायप्रणिभिर्दत्तमन्यत्किमपिभक्तितः॥चंडीशंतदितिरया
तंतेनतस्यहजीवनं॥धारयेच्छिवनिर्माल्यंभक्त्यालोभान्नधारयेत्॥भक्षणान्नरकंगछेत्भूषणाचेव
मूढधीः॥नंदिकेश्वरंप्रति॥शिवधर्मानउवाच॥रुद्राक्षकंकर्णाहस्तेस्वाङ्गकाचमस्तके॥लिंगंशिवा

श्रमंस्त्रानंभस्मस्त्रानंशिवसंध्यकं॥कंठेसूर्द्ध्युःपवीतेवारुद्राक्षान्धारयेन्नतः॥आगमोदिष्टसंख्याका
न्रुद्रलोकंसगछति॥रुद्रभक्तःशिरस्येकाधार्यारुद्रजटासदा॥ध्वंसनीसर्वदुःखानांतथारुद्रत्वमा
प्नुयात्॥सीतेनभस्मनाकुर्यात्रिसंध्येचत्रिपुंड्रकं॥सर्वपापविनिर्मुक्तःशिवलोकेमहीयते॥भूर्भि
हस्तेशरीरेवाधत्तारुद्राक्षमालिकां॥यस्तुभुंजीतसभक्तःसरुद्रोनात्रसंशयः॥रुद्राक्षधारणान्नित्यं
लोकेस्यंतपवित्रकं॥सर्वरोगप्रशमनंसर्वक्लेशविनाशनं॥सर्वतीर्थेषुयत्पुण्यंसर्वतीर्थेषुयत्फलं॥
तत्फलंलभतेसर्वंभस्मस्नानान्नसंशयः॥भस्मस्नानात्परंपवित्रंनेवविधीयते॥इत्युक्तोदेवैभ्यःस्नातो
देवःशिवःस्वयं॥ततःप्रभृतिब्रह्मार्घासुनयश्चशिवार्थिनः॥सर्वेपर्वसुयत्नेनभस्मस्नानंप्रचक्रि
रे॥दुःशीलोमुक्तकेशोवायोपापीवापिलक्षितः॥भूतिंत्रासनसंयोगात्सपूतोनात्रसंशयः॥न

गो ब्राह्मणभस्माग्निलिंगछायांयदास्पृशेत्॥ नलंघयेतनिर्माल्यमप्रतिष्ठेननग्नतः॥ नतत्रस्थापूजयेच्छि
वस्यांप्रतिग्रहातिशंकरः॥ यत्रनैवेद्यनिर्माल्यमलंघकपूजयेच्छिवं॥ असंस्पृश्यो भवेत्सोपियस्तस्यां
गमकंस्पृशेत्॥ तस्मान्नस्पृशेल्लिंगंनरोनिर्माल्यदूषितः॥ यत्रनैवेद्यनिर्माल्यंसंकीर्णंकलशांबुभिः॥॥
स्नानाद्यंक्रियतेभक्त्यानतत्रगृह्णातिशंकरः॥ रुद्राक्षान्कंठदेशेदशनपरिमितान्मस्तकेविंशतिंषट्
षट्कर्णप्रदेशेकरयुगलधृतान्द्वादशद्वादशैव॥ बाह्वोरिंदोःकलाभिःप्रथमगितिगणितानिकमेकंशि
रस्यंवक्षस्यष्टाधिकंयःकलयतिशतकंसस्वयंरुद्रएव॥ कर्मांसंकशिवेभक्तिःकर्मघंकशिवार्चनं॥
मद्यमांसप्रसक्तानांदूरेतिष्ठतिशंकरः॥ गर्भादिसर्वसंस्कारैरमशानांतेचभोजनं॥ रजस्वलादिसंस्प २३
र्शीशिवभक्तोविवर्जयेत्॥ लिंगार्चनंरुद्रजपोव्रतंशैवंदिनत्रये॥ वाराणस्यांतुमरणंमुक्तिरेषाचतुर्विधा॥

अष्टम्यांचतुर्दश्यांतथासोमदिनेपिच॥ अर्चयित्वामहादेवंनरोभोजीसदाभवेत्॥ इत्यादिशैवपाशुपतधर्माः॥
भस्माकुरु॥ गुरु॥२३॥ क्षत्रिणीशूद्रसंयोगात्क्षत्तारंजनयेत्सुतं॥ उमाशूद्र्यासमुत्पन्नाक्षत्रियाद्येनकेव
लात्॥ क्षत्तुरुग्रंजनयेत्क्षेमकंतनयंक्षितौ॥ सशूद्रधर्मसद्वृत्तोद्वाररक्षास्यजीवनं॥ द्वारवटेकरु॥
षडशद्र॥२४॥ क्षत्रिणीवैश्यसंयोगाज्जातोमागधिकाभिधः॥ वैश्यशूद्रसमायोगात्मवेदायोगनःसु
तः॥ मागधायोगवाभ्यांचभटकुशइतिजायते॥ सवर्णेबाह्योधर्मेषुसम्यक्संगीतकोविदः॥ कांतानां
नरस्यशालासुनरंलास्यंचशिक्षयेत्॥ जीविकातस्यकथितानृत्यंनरस्यकारणात्॥ भटकुशी॥ नटोवा॥
॥२५॥ आभीरीनरस्काभ्यांयोगाम्यधर्मेणजायते॥ शराणांकंकपत्रेश्वरचनातस्यजीविका॥ निर्मुंडि
का॥ सुन्नटा॥ तीरकरणारा॥२६॥ द्विजवैश्यसमायोगान्जातोबंदपुरंध्रिका॥ ब्राह्मण्यांजायतेवैश्या

चासौवैदेहिकाभिधः॥सांबष्ठजनयेसुत्रंवैदेहाद्वैनसंज्ञकं॥सऋऽधर्मरहितोभ्यसन्नाढ्यसलाघवं॥
जीविकातस्यविहिताहरिमेखलतेलखनं॥वेनः॥विजयादशमीचाढ्यौहरिमेखलकरणं॥चंद्रावळी
कार॥लाघवी॥२७॥वैश्यात्क्षत्रियसंयोगात्माहिष्याजायतेंगना॥क्षत्रियाविश्यसंयोगाज्जातोसो
मागधाभिधः॥सामाहिषीमागधाश्चसुद्रमार्गकसंज्ञकं॥जनयेन्ननयंसोपिऋऽधर्मविनाकृतः॥
गीतंचतुर्विधंवाद्यमभ्यसेज्जीवनायकं॥संगीतशास्त्रात्॥तत्रादौत्रिविधंवाद्यंगीतंचापिचतुर्वि
धं॥चतुर्दशविधंनृत्यंगीतपूर्वंविचक्षणैः॥अमरसिंहात्॥तंतुवीणादिकंवाद्यमानद्धमुरजादि
कं॥वंशादिकंचसुषिरंकांस्यतालादिकंघनं॥चतुर्विधमिदंवाद्यमभ्यसेज्जीवनायच॥ऋधर्मा
र्गकः॥मादली॥२८॥शूद्रादायोगवीजातावैश्ययामितिविश्रुता॥ग्रामण्यावैश्यजनितःसवैवैदेहि

कःस्मृतः॥अयोगवीसावैदेहीमैत्रेयंजनयेत्सुतं॥सादुःखसंयेनिसंघंटवादनतत्परः॥प्रबोधनंचलोका
नांकुर्यान्मंगलनिस्वनैः॥ललितंभरवीगायन्धनंसातस्यजीवनं॥मैत्रेयः॥पाहाटगाण॥दारवठेक
रु॥२९॥कैवर्तजंधिकाभ्यांयोजातोमंगुष्टसंज्ञकः॥सस्फोटयेद्वेखउकान्कृत्वाचूर्णीविशेषतः॥त
द्धनंजीवनार्थायसोपिकुर्यान्निरंतरं॥नतस्यस्पर्शःकर्तव्यःकदाचिदपिमानवैः॥कैवर्तोधीवरः॥
जांघियकः॥कुंभकारस्त्रियांवर्ण्यासंगात्सुत्रोहिजायते॥सचित्रकारोलोकेस्मिन्नामतःपरिकी
र्तितः॥सचित्राणिविचित्राणिपुरुषाकृतिमेवच॥तद्विक्रयतोलब्धंधनंतस्यहजीवनं॥भोंडोवा॥प्रति
बिंबीकर्त्ता॥३०॥वैदेहीतनयंसूतेनिषादादहितुंडकं॥सप्तानामेसजातीनांसधर्मसदृशःस्मृतः॥म
त्स्यपक्षिकरंडेषुक्षिप्त्वाविषधरान्बहून्॥तैःखलनंजीविकातुकथितास्यविशेषतः॥वैदेहिकंसांवा

णिकस्त्री॥गारुडी॥३॥आभीरीवेनसंयोगात्सैंधुलंजनयेत्सुतं॥असाधयमइत्युक्तःसर्वधर्मब
हिःकृतः॥सरांकुल्याविक्रयीतकुर्यात्तुनवर्धनं॥कलकल॥सुराकर्ती॥३२॥व्याधाहिंतुंडिकाभ्या
योजातोघोलिकसंज्ञकः॥सकुर्यात्मुखकादीनांहननंभूमिवासिनां॥बिलेशयानांसर्वेषामन्येषा
मपिसर्वतः॥ जनयेद्दिनंतेनतद्वर्त्तनंस्मृतं॥घोलिकोधर्मरहितोकथितोमुखकांतकः॥अ
हिंतुंडिकागारुडिकस्त्री॥घोलिकस्तणिजेकेकाडा॥उंदिरमारणारा॥३३॥पुल्कसस्त्रीपांसुलकात्सू
तेयंवासिकाभिदं॥सकुर्याज्जुरगादीनांशस्त्रेणैवचवर्त्तनं॥जीवनंतस्यनिर्दिष्टमसोसाकल्पकर्म
रुतं॥३४॥मेदस्यवंशवेनितासंगतातेनचेद्गहः॥सासुतेयवनंपुत्रंतुरुष्कःसप्रकीर्तितः॥यवन॥
तुरुका॥३५॥इत्यादिवर्णावर्णसंकरः॥संकीर्णवर्णसंकरः॥संकीर्णसंकराःवर्णानिरूपिताः॥अ

धुनासर्वेषांवसतिक्रमोलिख्यते॥पुरस्यमध्येवासार्थंराजादुर्गंप्रकल्पयेत्॥धारागृहैःसौधगृहैरुपकार्यो
भिरावृतं॥विचित्रकलशाकीर्णध्वजराजिविराजितं॥धनधान्यजलापूर्णंपरितोवीरसंकुलं॥स्थूलिभि
र्नीप्रशृंखलिभिरग्नियंत्रैःसमाकुलं॥सौधविलससप्तपरिधिपरितोपरिखावृतं॥पुरस्यान्तस्यवर्णानां
चतुर्णांवसतिःस्मृता॥नानापण्यसमाकीर्णांतस्यविध्यश्चतुष्पथाः॥राजामार्गानंधरंतत्रप्राङ्मुखाकस
मन्वितं॥धर्मबुद्धिंप्रयुंजीततद्घाढ्यजीवनां॥श्रेष्ठोवैश्योसयःश्चतुष्पथेतंनियोगेनथिषुवसेयुरित
रेजनाः॥दुर्गस्यवामतःसर्ववसेयुरनुलोमजाः॥दुर्गस्यदक्षिणेभागेवसेयुःप्रतिलोमजाः॥अनुलो
मजतोहीनाःश्रेष्ठायेप्रतिलोमजाः॥दुर्गस्यपश्चिमेभागेतेषांवैवसतिस्मृता॥त्रिविधोहिंसकारः॥त
द्लक्षणान्याह॥वर्णानुलोमाधमवर्णयोर्दोषस्यवर्णसंकरः॥तत्तज्जन्ययोर्मार्ष्यकरण्ययोर्दोषस्यवर्ण

संकीर्णसंकरः॥ वर्णसंकीर्णसंकरयोर्दांपत्यवर्णसंकीर्णसंकरः॥ तत्रविप्रात्मूर्धावसिक्तइत्यानुलोम्येन
वर्णसंकरजादर्शिताः॥ ब्राह्मण्याक्षत्रियात्सूतइतिप्रतिलोम्येनवर्णसंकरजादर्शिताः॥ माहिष्यकारण्या
न्तुरथकारःप्रजायते॥इतिसंकीर्णसंकरजादर्शिताः॥इदानीमधरोत्तरमिश्रेणवर्णसंकीर्णसंकरजाःप्रद
र्श्यंते॥ अधरेप्रतिलोमजाः॥उत्तरेअनुलोमजाः॥ तद्यथा॥मूर्द्धावसिक्तायांसंकीर्णायांमुत्तमायाक्षत्रि
यो वैश्यशूद्रयावर्णैरुत्पादिताः॥ अधरेनिषाद्यांसंकीर्णायांअधमायांब्रह्मक्षत्रियवैश्येरुत्तमैर्वर्णैरुत्पा
दिताः॥उत्तरेअधरेचोत्तरेच॥अधरोत्तरांपूर्ववदितिपदेनअसंतश्चविंशत्यइतिवचनार्थादितिदृश्यते॥
यथापूर्वोअधरोत्तरेवर्णसंकरजाः॥संकीर्णसंकरजाश्चप्रतिलोमजाःअसंतः॥अनुलोमजाश्चसंतः॥
तथावर्णसंकीर्णसंकरजाअप्यनुलोमजाःसंतः॥प्रतिलोमजास्त्वसंतइति॥इत्यपिउक्तत्रैविध्येवर्णसं

करेवर्णसंकीर्णसंकरवाश्रियोस्याद्यमानावर्णाभासाःषष्ठिर्भवतिसंकीर्णसंकरमाश्रियोस्याद्यमा
नाजात्याभासाःअनंताः॥नदुक्तंस्मृत्यंतरे॥प्रतिलोम्यानुलोम्येनवर्णास्तज्जैस्त्यक्तास्तः॥षष्ठ्येवा
न्यैप्रजायंतेतत्सूतैश्चनंतैतैतिप्रतिलोम्यानुलोम्याभ्यांवर्णैरुत्पादिताद्वादशवर्णजासैद्वादश्या
भिर्वर्णसंबंधादुत्पादिताअष्टचत्वारिंशत्॥एवंषष्टिसंख्योयंवोपलक्षिताअन्येवर्णाभासाःजा
यंते॥यद्यथा॥मूर्द्धावसिक्तादिमाहिष्योग्रकरणाःषडनुलोमवर्णजाःसूतवैदेहचांडालमागध
क्षत्तायोगवप्रतिलोमवर्णजाः॥इत्यंद्वादश॥त्रमूर्द्धावसिक्तोणानुलोमजेनक्षत्रियावैश्याशूद्रास्
त्पादितास्त्रयः॥प्रतिलोम्येनब्राह्मण्यामेकः॥अंबष्ठकस्यानुलोम्येनद्वौ॥प्रतिलोम्येद्वौ॥निषाद
स्यानुलोम्येनेकःप्रतिलोम्येनत्रयःमहिषस्यानुलोम्येनद्वौ॥प्रतिलोम्येनद्वौ॥उग्रस्यअनुलोम्येनेकः॥

प्रतिलोम्येनत्रयः॥करणस्यानुलोम्येनैकः॥प्रतिलोम्येनत्रयः॥इतिपूर्वोक्तषट्कोत्पादिताश्चतुर्विंशतिः॥एवं सूतादीनांषण्णामेकैकस्यचतस्रुषुवर्णास्त्रीष्वेकैकइतितेपिचतुर्विंशतिः॥एवंमिलित्वाषष्टिःसंपद्यते॥ तेभ्यःषष्टिसंख्येभ्यःउक्तादितैरयंश्रेराभासानांसंख्यायाःआनंत्यंभवति॥तेचत्रिंशत्सहस्रसंख्ययाभवंति॥अधुनाविवाहेवाहननियमःकथ्यते॥ब्राह्मणस्यसीतोवाजिपीतोवाजीन्यस्यच॥रक्तोवैश्यस्यवाजिस्यात्शामावाजितुपद्रवः॥चतुर्णामेववर्णानांयथावाहंतुरंगमः॥अन्यासामिहजातीनांनवाहोवाहनंभवेत्॥यानमारुह्यनश्रेष्ठमतिक्रामेत्कदाचन॥अतिक्रामंनसेवांक्ष्येयोयतेमोहालकंचरेत्॥येचान्येविवाहास्तुचतुर्वर्णानामेवेतिमनुयाज्ञवल्क्याभ्यांस्पष्टमभिहितं॥ब्राह्मोदैवस्तथैवार्षःप्राजापत्यस्तथासुरः॥गांधर्वोराक्षसश्चैवपिशाचोष्टोकरग्रहः॥चत्वोब्राह्मणस्याद्याश्चत्रागांधर्वराक्ष २७

सोवैश्यस्तथासुरोवैश्यशूद्रयोश्चस्युर्गर्हितः॥तुर्यंकन्यामयादत्तावाचायोनियमःकृतः॥सएवमिश्रजातीनांविवाहपरिकीर्तितः॥चतुर्वर्गचिंतामणौ॥वरणार्थंयदागच्छेदश्वारूढोभवेद्वरः॥पंचमेहनिनिर्गंतुंवडवायांसमारुहेत्॥वरणंनामअष्टोविवाहाः॥तेचचतुर्वर्णानामेवमिश्रजातीनांनअनुलोमंप्रसूतानांषण्णांक्षेत्रोचितोहयः॥विनानिषांचतुष्पथमहोत्सवः॥प्रतिलोमप्रसूतानामुच्यतेवाहनान्यथा॥चांडालादिविवाहेषुनरोयानंस्वमार्गेवाहनंखरः॥वामीयानंमागधस्यापिखरोजीवनंतथा॥एतासांहिविवाहेषुस्वमार्गेवाहनंखरः॥वामीयानंमागधस्यविदेहस्यक्रमेलकः॥अश्वयुक्खरोथायानंसूतस्यपरिकीर्तितं॥अष्टादशसमूहेषुमणिकांस्यापजीविनः॥येस्युस्तेषांविवाहेषुयानंवृषभमुच्यते॥नश्विरोवेष्टनंतेषांनातछत्रंनचामरं॥रंजितोविविधैर्वर्णैर्हयःकांचवि

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

निर्मितः॥ विवाहेवाहेवाहनंप्रोक्तंतक्षकस्यस्ववर्त्मनि॥ क्रोडीकृताःस्वजातीयैःनाधिताःषट्स्ववर्त्मनि॥ विवाहेस्वर्णकारोपिनद्वग्रछस्ववर्त्मनि॥ शकटंवृषसंयुक्तंवाहनंतिलयंत्रिणः॥ पर्यंकोवाहनंप्रोक्तंसूचिकस्यस्ववर्त्मनि॥ यद्वाजातिसुसर्वासुस्वजातीस्कंधरोहणं॥ मिदस्यंश्रावनिता॥ श्रोणिभ्रोणसमागता॥ संप्रसूतेतुयंपुत्रसतुरक्तःप्रकीर्तितः॥ तस्माद्विप्रश्चांडालोदयाहीनोतिनिष्ठुरः॥ म्लेछभाषानवक्तव्याप्राणैःकंठगतैरपि॥ यतःसर्वेषुशास्त्रेषुनीचोयवनास्मरः॥ नृत्यंवाद्यंतथागीतंतससुद्रादिधारणं॥ शूद्रजातीस्त्रियंधर्मनद्विजानांकदाचन॥ ॥ इतिबृहज्जातिविवेकःसमाप्तः॥ छ॥ ॥ इदंपुस्तकंबापटोपनामकरामचंद्रभट्टक्षेत्रउपाध्येनलिखितं॥ स्वार्थंपरोपकारार्थंच॥ छ॥ शुभंभवतुश्रेयकावलोकनयोः॥ श्रीगणपतिप्रसन्न॥ छ ॥ छ ॥ ॥ २८